INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN : 2277-7881
VOLUME 1, ISSUE 1, APRIL 2012

# पुराणपुरुषोत्तमः श्रीवेङ्कटनायकः

**Dr. P. Swapna Haindavee,** M.A., Ph.D.,
Principal (FAC),
M.R.Govt. Sanskrit College, Vizianagaram

**श्लो ॥ श्रीवेङ्कटाचलाधीशं श्रीयाध्यासितवक्षसम् ।**
**श्रितचेतनमन्दारं श्रीनिवासमहं भजे ॥**[1]

कलियुगप्रत्यक्षदेवः श्रीवेङ्कटेश्वरः । अयं देवः अन्यदेवैरिव न भवति । यदा भक्ताः प्रार्थयन्ते, तदा तत्क्षणमेव येन केनापि वा रूपेण सहायं कृत्वा स्वभक्तान् रक्षति । **'पुराणं नाम पुरापि नवमिति पुराणम्'** - प्राचीनमपि विषयम् आधुनिकमिव, नवीनमिव प्रतिभासते । पुराणं अधिकृत्य -

**श्लो ॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।**
**वंशानुचरितं चेति पुराणं पञ्च लक्षणम् ॥**

इत्युक्तत्वात् पुराणलक्षणं प्रतिभाति । एतादृशपुराणानां कर्ता वेदव्यासः । वेदव्यासः साक्षात् नारायणः एव । अमुं वेदव्यासं पुरस्कृत्य -

**श्लो ॥ अचतुर्वदनो ब्रह्म द्विबाहुरपरो हरिः ।**
**अफाललोचनश्शम्भुः भगवान् बादरायणः॥**

इत्युक्तत्वात् वेदव्यासः त्रिमूर्त्यात्मकस्वरूपः इति वक्तुं शक्यते । साक्षात् वैकुण्ठवासः श्रीमन्नारायणः एव अयं श्रीवेङ्कटनायकः कथं इत्युक्ते -

**श्लो ॥ कृते जनार्दनः प्रोक्तः त्रेतायां रघुनन्दनः ।**
**द्वापरे रामकृष्णौ च कलौ श्रीवेङ्कटेश्वरः ॥**

---

1. श्रीभविष्योत्तरपुराणन्तर्गतं श्रीवेङ्कटाचलमाहात्म्यम्, मङ्गलाचरणम्

कृतयुगे जनार्दनः इति, त्रेतायुगे श्रीरामः इति, द्वापरयुगे बलरामश्रीकृष्णौ, कलियुगे अस्मिन् श्रीवेङ्कटेश्वरः इति। इदानीं पुराणानां विशेषान् परिशीलयामः -

**श्लो ।। मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।**

**अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते ।।**

अष्टादश पुराणानां विवरणम् एवं वर्तते - मत्स्य, मार्कण्डेय, भागवत, भविष्य, ब्रह्म, ब्रह्माण्ड, ब्रह्मवैवर्त, अग्नि, नारद, पद्म, लिङ्ग, गरूड, कूर्म, स्कान्द, वामन, वायु, विष्णु, वराह पुराणानीति अष्टादश व्यासमहर्षिणा प्रणीतानि इति प्रपञ्चे प्रसिद्धमेव । ऋक्संहितायां - **प्रव**: **पान्तमन्धसो धियायते। महेशूराय विष्णवे चार्चत**[2] इति। एवमेव ऋक्संहितायां दशममण्डले वेङ्कटाद्रिं पुरस्कृत्य-

**अरायि काणे विकटे गिरि गच्छ सदान्वे।**

**शिरिम्बिठस्य सत्वभिस्तेभिष्ट्वा चातयामसि ॥** [3]

इति वर्तते वेङ्कटाद्रिः अतिप्राचीनतममिति। अत्र स्थितः वेङ्कटनायकः अतिप्राचीनतमः इति वेदोक्तरीत्या ज्ञायते। **वेदा**: **प्रभुसम्मिता**: पुराणानि मित्रसम्मितानि। किमर्थम् इत्युक्ते मित्रवदुपदेशं कुर्वन्ति। कस्मिन् पुराणे अयं पुराणपुरुषोत्तमः कथं वर्णितः इतीदानीं परिशीलयामः प्रथमतः पुरुषेषु उत्तमः पुरुषोत्तमः। उत्तमः इत्युक्ते श्रोष्ठः इति। पुरुषपदस्य सामान्यार्थस्तु स्त्रिया भिन्नः इति, नरः इत्यर्थः। किन्तु, वेदान्तार्थे तु **'पुरं नाम शरीरं अस्मिन् शेते'** इति पुरुषः नाम आत्मेत्यर्थः। आत्मरुपी भगवान् नाम पुरुषेषु उत्तमः अयं श्रीवेङ्कटनायकः।

उपपुराणेषु अन्यतममस्ति अदित्यपुराणम् इति तस्मिन् पुराणे **वेङ्कटेश**:' इत्यमुं पदम् उद्दिश्य एवं व्याख्यां कृतासीत्। **वें** इति अमृतबीजं पदं, **कट** इति ऐश्वर्यबीजं पदं आहत्य मानावानां यदावश्यकं

**2. ऋक्संहिता - मण्डलम् २. सू. १५५ मन्त्रः १**

**3. ऋक्संहिता - मण्डलम् १०. सू. १५५ मन्त्रः १**

तत् **वेङ्कट** इति पदेन आगमिष्यति । अमृतैश्वर्याणां समागमः **वेङ्कटेश** अनुग्रहेणैव भवतीति वक्तुं शक्यते । भविष्योत्तरपुराणे -

**श्लो ।। तदा नाम चकाराद्रेः वेङ्कटाचल इत्यपि ।**

**सर्वपापानि 'वें' प्राहुः 'कटः' तद्धाह उच्यते ॥**

इत्यनेन श्लोकेन ज्ञायते यत् साक्षात् श्रीमन्नारायणः वैकुण्ठादागत्य अत्र सर्वतीर्थव्यापिते गिरिशिखरे स्थितत्वात् वेङ्कटनायकः अभवत् ।

व्यासमहर्षेः आज्ञया सर्वाण्यपि पुराणानि सूतमहर्षिणा शौनकादिमहर्षिभ्यः उपदिष्टम् । तत्र च नैमिशारण्ये प्रशान्तवातवरणे श्रीमन्नारायणकथाः एवं पृष्टवन्तः । भविष्योत्तरपुराणान्तर्गते श्री वेङ्कटाचलमाहात्म्ये प्रथमाध्याये शौनकादिमुनयः सूतम् एवं पप्रच्छुः ।

**श्लो ।। सूत सूत महाभाग ! सर्वशास्त्रविशारद !**

**त्वत्तोहं श्रोतुमिछामि माहात्म्यं पुण्यवर्धनम् ॥**

**श्लो ।। कथितं रङ्गमाहात्म्यं त्वया हस्ति गिरीशितुः ।**

**जगन्नाथस्य वै विष्णोः माहात्म्यमतुलं मुने ॥**

**श्लो ।। इदानीं श्रेतुमिच्छामि माहात्मयं वेंकटेशितुः ॥** [4]

तदा सूतभगवान् एवं समाधत्त -

**श्लो ।। साधुपृष्टं त्वया ब्रह्मन् ! चरितं वेङ्कटेशितुः ।**

**यथाश्रुतं मया पूर्वं व्यासादमिततेजसः ।।**

**तत्तथाहं समाचक्षे सावधानमनाः श्रुणु ।।** [5]

---

**4. श्रीभविष्योत्तरपुराणन्तर्गतं श्रीवेङ्कटाचलमाहात्म्यम् 1. 1-2**

**5. श्रीभविष्योत्तरपुराणन्तर्गतं श्रीवेङ्कटाचलमाहात्म्यम् 1. 3**

इति उकत्वा पुराणापुरुषोत्तमस्य श्रीवेङ्कटनायकस्य चरितं, तस्य निवासस्थानं तिरुमलक्षेत्रं चाधिकृत्य सविस्तरं व्यावृणोत् । प्रथमतः जनकमहाराजः शतानन्दमुनेश्च सम्भाषणरूपेण चलितं सविस्तरं व्याख्यातवान् - जनकः शतानन्दं प्रति श्रीवेङ्कटाचलमाहात्म्ये प्रपञ्चविरूद्धं वञ्चां एवं व्यनक्ति।

**श्लो ।। सुखमेव सदा मे स्यात् दुःखं माभूत् कदाचन ।**

**दुःखं न वीक्षे नेत्राभ्यां सुखं वीक्षे सदात्मनः ॥**

एवंरूपेण जनकमहाराजस्य इच्छां दृष्टवा भगवान् स्वयं तत्क्षणमेव तस्य दुःखं प्रस्तापयामास। कथम् एतत् दुःखं दूरीभविष्यति इति पृष्टः जनकः शतानन्देन श्रीवेङ्कटनायकस्य चरितश्रवणादेव दुःखापनोदः भविष्यतीति उक्तवान्। तदा श्रीवेङ्कटनायकस्य चरितं श्रोतुम् अत्यन्तोत्साहेन उपविष्टवान्। प्रथमतः श्रीवेङ्कटनायकस्य निवासयोग्यम् अचलम् अधिकृत्य -

**श्लो ।। कृते वृक्षाद्रि वक्ष्यन्ति त्रेतायामञ्जनाचलम् ।**

**द्वापरे शेषशैलेति कलौ श्रीवेङ्कटाचलम् ।।**

नामानि युगभेदेन शैलस्यास्य भवन्ति हि इति कृतयुगे वृक्षाद्रिः इति, त्रेतायुगे अञ्जनाचलम् इति द्वापरयुगे शेषशैलम् इति कलियुगे वेङ्कटाचलम् इति युगभेदेन नामानि प्राप्तानीति उपदिष्टवान् जनकं शतानन्दः इति सूतः शौनकादिमुनीन् विवृणोत्।

अधुना भविष्योत्तरपुराणोक्तां **पुराणपुरूषोत्तमस्य श्रीवेङ्कटनायकस्य** कथां संक्षेपेण पारिशीलयामः । महर्षयः सर्वेऽपि यज्ञं कर्तुं निश्चितवन्तः तदा नारदमुनीन्द्रः तत्रागत्य **यज्ञभोक्ता** कः ? इति पृष्टवान्। तैः न समाधत्तम्। यज्ञभोक्तारं निर्णेतुं भृगुमहर्षिं प्रेषितवन्तः। तदा भृगुः प्रथमतः सृष्टिकर्तुः निवासं ब्रह्मलोकं गतवान्। तत्र ब्रह्म वाणीवीणाविनोदेन आगतं महर्षिम् अज्ञात्वा तस्य अर्घ्यपाद्यादीन् अतिथिसत्कारान् न कृतवान्। तदा कुपितः भृगुः ब्रह्माणं कलियुगे भवतः विग्रहार्चनदिकं न भवति इति शप्तवान्।

भृगुः कैलासं गतवान् । तत्र महेश्वरः पार्वत्या सह ताण्डवं कुर्वन् आगतं भृगुं न ज्ञातवान् । तदा च कुपितः सः शिवं त्वं **स्थाणु र्भव** इति शत्पवान् । ततः वैकुण्ठं गतवान् तत्र श्रीमन्नारायणः शेषशयनस्सन् महालक्ष्म्या सह सम्भाषणं कुर्वन् लक्ष्म्याः पादपीडनक्रियया आनन्दमनुभवन् आस्ते । कुपितः भृगुः श्रीमहाविष्णोः श्रीमन्नारायणस्य वक्षसि स्वपादेन ताडितवान् । दयालुः श्रीमन्नारायणः हे स्वमिन् किं भवतः पादस्य श्रमः अभवत् वा इति पृष्ट्वा तस्य पादं गृहीत्वा भृगोः पादे स्थितं तस्य गर्वकारणभूतं अक्षि पीडितवान् । प्रतिनिवृत्तः भृगुः **'श्रीमन्नारायणः'** एव यज्ञभोक्ता इति निश्चित्य यज्ञम् अकुर्वन् । तत्र वेकुण्ठमहालक्ष्मीः तस्याः निवासयोग्यं श्रीमन्नारायणस्य हृत्सथानं पादेन ताडितं इति कुपिता विष्णुं परित्यज्य कुत्रापि वा गाता । तामन्विष्यन् नारायणः तिरुमलगिरिं प्राप्य श्रान्तः तत्रैव तिन्त्रिणीवृक्षस्य अधः वल्मीके निविष्टवान् तत्रारभ्य आकशराजदुहितुः पद्मावत्याः परिणयपर्यन्तम् अनन्तरम् महालक्ष्म्याः समागमः इत्यादि विषयाः उपवर्णिताः । वेङ्कटाचले निवसतीत्यः वेङ्कटनायकः अभवत् श्रीमन्नारायणः । प्रथमतः श्रीमहाविष्णोः वेङ्कटनायकस्य वराहस्वमी एव विना मूल्यं तस्य निवासयोग्यं स्थलं दत्तवान् । वेङ्कटनायकः तस्य प्रथमं दर्शनं भवतु इति निश्चितवान् तदारभ्य तिरुमलक्षेत्रे श्रीवेङ्कटेश्वरदर्शनात्पूर्वं वराहस्वामिनः दर्शनं कुर्वन्ति भक्ताः ।

तदेव न वराहपुराणे प्रथमभागे पञ्चाशत्तमाध्याये श्रीवेङ्कटेश्वरमहोत्सवघट्टे उत्सवानां वर्णनं एवं कृतमासीत् ।

**श्लो ।। अङ्गवङ्गकलिङ्गेषु गौडकाश्मीरसिंन्धुषु ।**
**चोलमालवपाण्ड्येषु कोशलेषु कुशेषु च ।।**
**वसन्तस्ते जनास्सर्वे सकुटुम्बास्समाययुः ।**
**दुष्यन्तः संघशथचोच्चैः 'गोविन्देति' पुनः पुनः ।**
**योगिनामत्यदृश्योसौ दयया सर्वजन्तुषु ।**
**सर्वप्रत्यक्षतां यातः श्रीनिवासः परात्परः ।। वराहपुराणम् ।।**

तदारभ्य पर्वते अस्मिन् तिरूमलगिरौ 'गोविन्द' इति सदा सर्व था नाम स्मरणं भवत्येव।

पद्मपुराणे क्षेत्रकाण्डे त्रयस्त्रिंशोऽध्याये विमानमध्यगतं श्रीवेङ्कटाद्रौ स्थितं श्रीनिवासं ब्रह्मादयः देवाः एवम् अस्तुवन् -

**श्लो ॥ जय श्रियः पते ! विष्णो ! जय सत्याच्युतानिशम् ।**

**जयानिरूद्ध ! भगवन् ! जय पूरुष पूर्वज ! ॥**

**जयेश सर्वजगतां जय श्रीकण्ठपूजित ! ।**

**जयात्मेश्वर ! जीवातो ! जय त्वमपराञ्चित ! ॥**

अस्मांक दैवं पुराणपुरुषोत्तमं श्रीवेङ्कटनायकं, तस्य तिरुमलगिरिं तत्रस्थिततीर्थानि क्षेत्राणि अधिकृत्य गरुडपुराणान्तर्गते 83 तमेऽध्याये, ब्रह्मपुराणे क्षेत्रखण्डान्तर्गते प्रथमाध्यायात् एकादशाध्याय-पर्यन्तं, मार्कण्डेयपुराणे प्रथमाध्यायादारभ्य पञ्चमाध्याय पर्यन्तम्, वामनपुराणे क्षेत्रखण्डान्तर्गते विशाध्यायात् अद्यायादारभ्य चतुश्चतारिंशाध्यायपर्यन्तं चतुर्विंशत्याध्यायेषु वेङ्कटनायकस्य वैभवं वर्णितमासीत्। हरिवंशगते शेषधर्मान्तेऽपि वर्णनं अस्मभिः द्रष्टुं शक्यते। एवमेव ब्रह्मपुराणे, स्कान्दपुराणे, आदित्यपुराणे, भविष्योत्तरपुराणे च वेङ्कटनायकस्य वैभवं, तीर्थक्षेत्रमाहात्म्यादिकं, भक्तानां अनुग्रहादिकम् उपवर्णितमासीत् । अत एव अस्माकं देवः श्रीमन्नारायणस्वरूपः श्रीवेङ्कटेश्वरः पुराणपुरुषोत्तमः श्रीवेङ्कटनायकः इति वक्तुं नात्यतिशयोक्तिः इति शम्।

## उपयुक्तग्रन्थसूची (Bibliography)

1. श्रीभविष्योत्तरपुराणम्, चौखम्बा सुरभारती प्रकाशनम्, वारणासी।
2. ऋक्संहिता, चौखम्बा सुरभारती प्रकाशनम्, वारणासी।
3. हरिवंशम्, चौखम्बा विद्याप्रकाशनम्, वारणासी।